**5th Semester BA (CBCSS)**

**Core Course in Sanskrit Special Vedanta**

**CODE VI. माण्डूक्योपनिषत् (शाङ्करभोष्योपेतः)**

I. पदेनैकेन उत्तरं लिखत। 1-16

1. इदं सर्वं किं भवति ?
2. माण्डूक्यापनिषत् केन वेदेन संबद्धा भवति?
3. बहिष्प्रज्ञः कः?
4. आत्मनः द्वितीयः पादः कः?
5. आनन्दभुक् चेतोमुखश्च आत्मपादः कः?
6. हृदि स्थितः आत्मा कः?
7. तुर्ये सा न विद्यते। सा का?
8. तैजसः केन ओङ्कारपादेन सदृशः उक्तः?
9. विश्वस्य अत्वविवक्षायां किं सामान्यं भवति?
10. चेतः कुत्र युञ्जीत?
11. स्वप्ने सर्वभावानां वैतथ्यं केन हेतुना उच्यते?
12. आत्मा कीदृशैः भावैः विकल्पिताः?
13. कदा द्वैतं न विद्यते?
14. न प्रज्ञनघनमिति श्रुत्या कस्य प्रतिषेधः?
15. स्वप्ननिद्रयोः क्षीणे किं पदमश्नुते?
16. प्राज्ञस्य मकारभावे किं सामान्यम् उत्कटम्?

II. वाक्येन वाक्याभ्यां वा पञ्चानामुत्तरं लिखत – (17-24)

17. माण्डूक्यकारिकायाः प्रयोजनं किम्?
18. वैतथ्यप्रकरणस्य प्रयोजनं किं भवति?
19. वैश्वानरशब्दस्य अर्थः कः?
20. त्रिधा तृप्तिं निबोधत – तृप्तेः त्रैविध्यं कथम्?
21. कः मुनिः भवति?
22. स्वप्ने भावानां मिथ्यात्वं कुतः स्मृतम् ?
23. विचक्षणैः इदं विश्वं कथं दृष्टम्?

24. अद्वयतां समनुप्राप्य लोकं कथमाचरेत?

III. चतुर्णामुत्तरं लघूपन्यासरूपेण लिखत

25. वैश्वानरस्वरूपमुपनिषदनुसारं लिखत।

26. सृष्टिविषये मतभेदान् प्रदर्शयत।

27. मकारस्य प्राज्ञस्य च सादृश्यानि प्रदर्शयत।

28. तुरीयस्वरूपं लिखत।

29. जाग्रद्दृश्यानां वैतथ्यमुपपादयत।

30. भावैरसद्भिरेवायमद्वयेन च कल्पितः।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा।। व्याख्यात।

IV. द्वौ उपन्यसत

31. आत्मनः चतुष्पात्त्वं निरूपयत।

32. सृष्टिविषयकमतभेदानि संक्षिपत।

33. ईश्वरस्य जगत्कल्पना कथमिति विशदयत।

**Answers and keys**

I.

1. ओङ्कारः।
2. अथर्ववेदेन।
3. वैश्वानरः।
4. तैजसः।
5. प्राज्ञः।
6. प्राज्ञः
7. बीजनिद्रा।
8. उकारेण।
9. आदिसामान्यम्।
10. प्रणवे।
11. संवृतत्वेन।
12. प्राणादिभिः भावैः।
13. अद्वैते ज्ञाते।
14. सुषुप्तस्य।
15. तुरीयमिति।
16. मानसामान्यम्।

II.

17. रोगार्तस्य रोगनिवृत्तौ स्वस्थतेव दुःखात्मकस्यात्मनो द्वैतप्रपञ्चोपशमे स्वस्थता भवति कारिकायाः प्रयोजनम्।

18. यस्य द्वैतप्रपञ्चस्योपशे अद्वैतप्रतिपत्तिः रज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः तस्य द्वैतस्य हेतुतः वैतथ्यप्रतिपादनाय वैतथ्यप्रकरणमारभ्यते।

19. विश्वेषां नराणामनेकधा नयनात् वैश्वानरः। अथवा विश्वश्च असौ नरश्च इति विश्वानरः। विश्वानरः एव वैश्वानरः।

20. विश्वं तर्पयते सथूलं, प्रविविक्तं तैजसं तथा आनन्दः प्राज्ञं च तर्पयते। एवं तृप्तेः त्रैविध्यमुक्तम्।

21. अमात्रः अनन्तमात्रः द्वैतपोपशमरूपः ओङ्कारः येन विदितः सः एव मुनिः भवति।

22. स्वप्ने दृष्टभावानां सप्रयोजनता विप्रतिपद्यते तथा आद्यन्तवत्वात्  च ते मिथ्यैव स्मृताः।

23. यथा स्वप्नमाये दृष्टे यथ वा गन्धर्वनगरं तथैव वेदान्तेषु इदं विश्वं विचक्षणैः दृष्टम्।

24. अद्वैतं समनुप्राप्य जगवल्लोकमाचरेत।

III.

25. जागरितस्थानः भवति वैश्वानरः। स्वात्मभिन्ने बाह्यविषये भवति तस्य प्रज्ञा। अत- सः बहिष्प्रज्ञ उच्यते। तस्य सप्ताङ्गानि सन्ति। तानि च यथा – तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येवप पादौ – इति । तथा अयः एकोनविंशतिमुखश्च भवति। पञ्च ज्ञान्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च प्रणाः, मनोबुद्ध्यहङ्कारश्चित्तानि इति एखोनविंशतिमुखानि। तानि अस्य वैश्वानरस्य सन्तीति वैश्वानरः एकोनवंशतिमुख उच्यते।

26. प्राणः सर्वभावानां प्रभवः इति। ईश्वरस्य विभूतिरेव सृष्टिः। सृष्टिः स्वप्नमायासरूपा। प्रभोः इच्छैव सृष्टिः। कालादेव भूतानां प्रसूतिः इति कलचिन्तकाः। सृष्टिः भोगार्थ क्रीडार्थं वा। देवस्वभाव एव सृष्टिः।

27. आत्मनः तृतीयः पादः भवति तैजसः। ओङ्करास्य तृतीयः पादः भवति मकारः। मितिः भवति साम्यम् – मितिः – मानं –विश्वतैजसौ प्राज्ञेन मीयेते। प्रलयोत्पत्त्योः प्रवेशनिर्गमनाभ्याम्। ओङ्कारसमाप्तौ पुनः प्रयोगे अकारोकारौ मकारं प्रविश्य निर्गच्छतीव।

28. मात्रारहितत्वात् अमात्रः। अव्यवहार्यः – वाङ्मनसोः क्षीणत्वात्। प्रपञ्चोपशमः शिवः अद्वैतः।

29. जाग्रद्दृश्यानां वैतथ्यं दृश्यत्वात्, स्वप्नदृश्यवत्। आदौ अन्ते च जाग्रद्दृश्यानाम् अभावात् वर्तमाने अपि तेषां वैतथ्यम् (मिथ्यात्वम्)। मृगतृष्णिकावत्।

30. माणडूक्यकारिकायाः उद्धृतः अयं श्लोकः। आत्मा प्राणादिभिः असद्भिः भावैः कल्पितः रज्जुः सर्पधारादिवत् यथा तथा। एते भावाः अद्वयेन सता विकल्पिताः। सर्वकल्पनास्पदत्वत् अद्वयस्यैव सत्यता।

IV.

31. जागरितस्थानः बहिष्प्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः।(तस्य ह वा एतस्य इत्यादिश्रुत्या सप्ताङ्गत्वं, पञ्चशः ज्ञान-कर्मेन्द्रियाणि प्राणपञ्चकं तथा बुद्धिमनोऽहङ्कारचित्तानीति ऐकोनविंशति मुखत्वं, सथूलविषयानुभवात् स्थूलभुक्त्वम् च।)।स्वप्नस्थानः अन्तःप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः प्रविविक्तभुक् तैजसः द्वितीयः पादः। (इन्द्रियापेक्षया अन्तःस्थत्वात् अन्तःप्रज्ञः, प्रकाशरूपायां प्रज्ञायां विषयित्वेन भवतीति तैजसः, वासनामात्रा प्रज्ञा भोज्येति प्रविविक्तभुक् च)। सुषुप्तस्थाने एकीभूतः प्रज्ञानघन एव आनन्दमयः आनन्दभुक् चेतोमुखः प्राज्ञः तृतीयः पादः।(सुषुप्तं स्थानमस्येति सुषुप्तस्थानः,रूपापरित्यागेन अविवेकापन्नं नैशतमोग्रस्तमिवाहः सप्रपञ्चमेकीभूतमित्युच्यते, स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानि सेयमवस्था अविवेकरूपत्वात् प्रज्ञानघन इत्युच्यते। आनन्दप्रायः इति आनन्दमयः। अनायासस्थिनन्दभुक्। स्वप्नादिपिरतिबोधचेतः प्रति द्वारीभूतत्वात् चेतोमुखः। भूतभविष्यद्विषयकज्ञातृत्वम् अस्य अस्ति इत्यतः प्राज्ञः। )। नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानधनं न प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं भवति चतुर्थं पादम्। (नान्तःप्रज्ञमिति तैजसप्रतिषेधः। न बहिष्प्रज्ञमिति विश्वप्रतिषेधः। नोभयतःप्रज्ञमिति जाग्रत्वस्वप्नयोः अन्तरालवस्थाप्रतिषेधः। न प्रज्ञानघनमिति सुषुप्तावस्थाप्रतिषेधः। बीजाभावाविवेकरूपत्वात्। न प्रज्ञमिति सर्वविषयप्रज्ञातृत्वप्रतिषेधः। नाप्रज्ञमिति अचैतन्यप्रतिषेधः।)

32. प्राणः सर्वभावानां प्रभवः इति एकं मतम् – अग्नेः विस्फुळिङ्गवत् सृष्टिः। ईश्वरस्य विभूतिः इति मतान्तरम्।स्वप्नमायसरूपा सृष्टिः।प्रभोः इच्छामात्रं सृष्टिः।कालात् भूतानां सृष्टिरिति कालचिन्तकाः।

33. देवः आत्मना आत्मानं स्वमायया कल्पयति।प्रभुः चित्ते एव कल्पयते। पूर्वं जीवं कल्पयते।जीवकल्पनातः परं पृथग्विधान् भावान् कल्पयते।रज्ज्वां सर्पधारादिवत् भिन्नैः भावैःआत्मा विकल्पितः।